श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये

# ॥ पञ्चमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पञ्चमः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

ततः समानीतरसालपाकः संवीजयन् पाटलगन्धवाहैः।
निरूढमल्लीविभवो निदाघः सीरायुधं शौरिसखं सिषेवे ॥ **5.1** ॥

अबिभ्रतीनां कुचकुम्भकक्ष्यां आलिप्तकर्पूरहिमोदकानाम्।
स सुभ्रुवां देहगुणेन यूनां आसीत् वसन्तादपि माननीयः ॥ **5.2** ॥

विहारयूना भजता स्वयं तत् व्रजाङ्गनाविभ्रमकिङ्करत्वम्।
नितान्तधन्याः स्वगुणैरभूवन् निर्विश्यमानाः ऋतवः क्रमेण ॥ **5.3** ॥

कृतावसेका इव कृष्णगीतैः वनद्रुमा वर्धिततुङ्गशृङ्गाः।
अयत्नलब्धानि गवां बभूवुः स्थायीनि वर्षातपवारणानि ॥ **5.4** ॥

बभञ्ज वातः प्रबलो न वृक्षान् न तिग्मरश्मिः सलिलं तताप।
ददाह वन्यां न च तत्र दावः संरक्षिता यत्र गवां स देवः ॥ **5.5** ॥

गावो महिष्यश्च गभीरनादाः सञ्चारिताः शार्ङ्गभृता यथार्हम्।
कलिन्दकन्यामवगाह्य काले घर्मापदा सम्पदमेव भेजुः ॥ **5.6** ॥

गतेऽपि भूयिष्ठगुणे वसन्ते गोपाः सुखं चारितगोधनास्ते।
कलिन्दजानूपसमीपभाजः कालं कठोरातपमत्यनैषुः ॥ **5.7** ॥

वितेनिरे जङ्गमधामकल्पैः अनोभिरध्यासितचत्वराणि।
निदाघवर्षानुगुणानि गोपाः स्थानानि गोवत्सगुणोचितानि ॥ **5.8** ॥

अकालकाल्येन परेण पुंसा साम्यं गतानामिव वल्लवीनाम्।
सुखाय सर्वे समया बभूवुः स्वैः स्वैरविच्छिन्नगुणैर्विशेषैः॥ **5.9** ॥

सुधाप्लवस्वैरसखीमभिख्यां वनाश्रिते वर्षति कृष्णमेघे।
मध्यन्दिनेऽप्यादिदिरे विहारान् गावः प्रकामं गतघर्मतापाः॥ **5.10** ॥

तापापहन्तुः स्वपदाश्रितानां तत्तादृशा तस्य समीक्षणेन।
न तस्य गोपाध्युषितस्य जज्ञे वनस्य वातातपवह्निपीडा॥ **5.11** ॥

प्रसाधिताः पाटलपुष्पजालैः प्रच्छायनिद्राशमितोपतापाः।
दिनावसानस्नपनेन शीता गोप्यः प्रियैर्निर्विविशुः निशीथान्॥ **5.12** ॥

निदाघतैक्ष्ण्यादिह दुष्टसत्त्वाः क्षोभं गवां कुर्युरतिक्षुधार्ताः।
इतीक्षमाणः सहजेन सार्धं व्यधत्त नाथो मृगयाविहारम्॥ **5.13** ॥

प्रसक्तगङ्गायमुनानुषक्त्या भासा तयोराहितगाढमोहाः।
अयत्नलभ्योपगमास्तदाऽऽसन् व्यालाः क्षणादर्भकवेधयोग्याः॥ **5.14** ॥

अनुप्रयातैरिव देवमायां अच्छेदनीयैरपि दिग्गजानाम्।
वनं तदन्तर्गतसत्त्वजातं पाशैरवारुन्धत वत्सपालाः॥ **5.15** ॥

अनन्तलीलोचितभूमिकाप्तैः आवेदितान् वेदवनेचरेन्द्रैः।
पथः समास्थाय गृहीतचापा गुप्तस्थितिं गोपसुता वितेनुः॥ **5.16** ॥

क्षणादनिर्धार्य निदानभेदं दत्तापहासैः वनदेवताभिः।
मृगायितं तत्र मृगेन्द्रमुख्यैः सिंहायितं गोकुलसारमेयैः॥ **5.17** ॥

परिस्फुरत्कृत्रिमसत्त्वजातैः प्रसारितैः श्यामपटैर्वनान्ते।
स्वयं तिरोधाय तदर्हशब्दाः गोपा मृगान् गूढचराः चकर्षुः॥ **5.18** ॥

शतावरीदामनिबद्धमूर्ध्नः शार्ङ्गध्वनित्रासितसिंहयूथान्।
अनीकनाथप्रमुखानकार्षीत् अग्रेसरान् व्याधतनून् अनन्तः॥ **5.19** ॥

विमुक्तपाशा मधुवैरिभृत्यैः जिह्वालदुर्दर्शकरालवक्त्राः।
निपेतुरन्योन्यविमुक्तरोषाः श्वानो वराहेषु निशातदंष्ट्राः॥ **5.20** ॥

सम्भूय गोपाः प्रसभं प्रयुक्तैः सत्त्वानि वन्यानि समग्रसत्त्वाः।
गुहामुखाम्रेडिततीव्रघोषैः कोलाहलैराकुलयाम्बभूवुः॥ **5.21** ॥

अमृष्यतो मानुषसिंहनादं गिरीन्द्ररोधैरपि दुर्निरोधान्।
बभञ्ज दृप्तो बलभद्रसिंहः सिंहान् द्विपेन्द्रानिव दुर्निवारः॥ **5.22** ॥

गुञ्जाकलापप्रतिनद्धकेशैः आगुल्फमालम्बितपिञ्छजालैः।
निषङ्गिभिश्चारुपृषत्कचापैः गुप्तो बभौ गोपसुतैर्मुकुन्दः॥ **5.23** ॥

आक्रान्त्यकम्पेषु नगेषु धैर्यं शौर्यक्रमं श्वापदविक्रमेषु।
अशिक्षयत् क्षेमविदात्मभृत्यान् विहारगोपो मृगयापदेशात्॥ **5.24** ॥

आदाय लूनानि मुकुन्दबाणैः शृङ्गाणि शीघ्रं वनकासराणाम्।
शार्ङ्गप्रमाणानि शनैरकार्षुः तैरेव चारूणि धनूंषि बालाः॥ **5.25** ॥

मनुष्यमांसस्पृहया सरोषं गुहान्तरादुत्पतितुं प्रवृत्तान्।
शिलीमुखैः कीलितशैलकण्ठान् कृष्णस्तदा केसरिणश्चकार॥ **5.26** ॥

नवाहृतैर्नाथपरिष्क्रियार्हां गुञ्जास्रजं गोपकुमारवीराः।
विभिन्नवन्यद्विपकुम्भमुक्तैः मुक्ताफलैरन्तरयाम्बभूवुः॥ **5.27** ॥

शराहतानां विपिने मृगाणां आर्द्राहृतैश्चर्मभिरात्तहर्षाः।
अकल्पयन्नास्तरणानि गोपाः संवेशयोग्यानि सहायिनीनाम्॥ **5.28** ॥

अभिन्न पार्श्वेष्ववकाशभेदात् भिन्नस्थितीन् भीतिमपोह्य वत्सान्।
निरस्तसिंहेषु गुहागृहेषु न्यवीविशन् नाथनियोगभाजः॥ **5.29** ॥

अयातयामैरचिरप्रतापात् सुमृष्टपाकैरधिशल्यशृङ्गम्।
मांसैर्मृगाणां मधुनाऽवसिक्तैः नन्दस्य भृत्या विपिने ननन्दुः॥ **5.30** ॥

निवेद्यमानान् वनदेवताभिः सङ्गृह्य वन्यान् उपदाविशेषान्।
समं सुहृद्भ्यः सहसा विभेजे रामानुरोधेन रमासहायः॥ **5.31** ॥

त्राणं सतां दुष्कृतिनां विनाशं तन्वन्नभीष्टं मृगयाच्छलेन।
स्वच्छन्दचर्यानुगुणं गवां तत् चक्रे वनं शान्तमृगावशेषम्॥ **5.32** ॥

निसर्गकारुण्यतरङ्गवृत्त्या निर्वैरतां नैगमगोपदृष्ट्या।
सम्प्रापिताः प्रापुरिवैकजात्यं केचित् गवां केसरिदन्तिमुख्याः॥ **5.33** ॥

विधून्वता धूलिकदम्बरेणून् धाराकदम्बाङ्कुरकारणेन।
निन्युः श्रमं निर्झरबिन्दुभाजा नभस्वता नन्दसुतानुयाताः॥ **5.34** ॥

अमर्त्ययक्षेश्वरधामभाजोः आरामयोरेकमिवावतारम्।
प्रशान्तघर्मातिशयं प्रभावात् बृन्दावनं नन्दसुतो वितेने॥ **5.35** ॥

दिशं समाक्रम्य करैरुदीचीं देवे रवौ दक्षिणतः प्रवृत्ते।
निदाघक्लृप्त्या निगृहीतदेहां वृष्टिं पुनः स्रष्टुमियेष शौरिः॥ **5.36** ॥

अथाविरासीदपसारयन्ती तापं गवां चण्डकरप्रसूतम्।
विचित्रसस्योदयमेचकाङ्गी मेघाविला माधवयोगवेला॥ **5.37** ॥

महीभृतः सम्भृततीर्थतोयैः अम्भोधरैराचरिताभिषेकाः।
प्रयुक्तविद्युद्वलयैः पुनस्तैः प्रायेण नीराजनमन्वभूवन्॥ **5.38** ॥

धौतावदातैः क्रकचच्छदानां पत्रैरविश्रान्तषडङ्घ्रिनादैः।
व्यदारयत् पुष्पशरः प्रतूर्णं मानग्रहं मानवतीजनानाम्॥ **5.39** ॥

पयोमुचा सेकवतां स्थलानां वीरुत्प्ररोहा विविधा बभूवुः।
समीक्षितानां मधुसूदनेन श्रद्धादयाद्या इव सद्गुणौघाः॥ **5.40** ॥

शितेन पञ्चेषुशरेण भिन्नात् वियोगिनीमानसतो विकीर्णाः।
तदेन्द्रकोपत्वमिवाधिजग्मुः शोणाः क्षितौ शोणितबिन्दुभेदाः॥ 5.41॥

मधुद्रुतेरुल्बणदन्तवीणा मेघानिले मेदुरबिन्दुजाले।
प्रभूतकम्पाः प्रथयाम्बभूवुः शीतालुतां कण्टकिनः कदम्बाः॥ 5.42॥

शतह्रदाशस्त्रविलासदीप्ता धीरप्रणादा धृतचित्रचापा।
कनद्बलाका ध्वजपङ्क्तिरासीत् कादम्बिनी कामचमूरपूर्वा॥ 5.43॥

मृदङ्गधीरस्तनितो विहायाः सौदामिनीसम्भृतचारुलास्यः।
बभौ नवानां प्रभवो रसानां रतिप्रियस्येव नटस्य रङ्गः॥ 5.44॥

अचिन्तितोपस्थितजीवनानां आसेदुषामभ्यधिकां समृद्धिम्।
तोयाशयानां परिवाहजन्या स्वगुप्तिरन्योपचयप्रदाऽभूत्॥ 5.45॥

गुहासु गोवर्धनसम्भवासु प्रकामविस्तीर्णसमस्थलीषु।
गुणाधिको विश्वसृजा प्रवर्षे वासः समाधीयत वल्लवानाम्॥ 5.46॥

दरीषु गोप्यः प्रसमीक्ष्य कृष्णं दिशासु जीमूतगणं मयूर्यः।
अग्रे पतीनामभिगीतिनादं वितेनिरे चारु विहारलास्यम्॥ 5.47॥

पयोदलक्ष्यप्रहिताग्रहस्तां कृष्णः स्वनेत्रे इव चन्द्रसूर्यौ।
तिरोदधानां प्रतिरोद्धुमैच्छत् स्वैरी स्वलीलामिव वर्षवेलाम्॥ 5.48॥

अथाञ्जनस्निग्धनभः प्रकाशाः क्षणत्विषां कल्पितलास्यभङ्गाः।
दिशामुखोल्लासनदृष्टदाक्ष्याः दीनाम्बुवाहा दिवसा बभूवुः॥ 5.49॥

अलक्ष्यतीव्रातपमन्तरिक्षं सितासितैरम्बुधरैश्चकाशे।
विवेकमासादयतामिवादौ चित्तं वितर्कैरनिवर्तमानैः॥ 5.50॥

विहाय सद्यः कुटजार्जुनादीन् विप्लावितान् कालविपर्ययेण।
पुनर्बबन्धुः प्रणयं द्विरेफाः कोशोपपन्नेषु कुशेशयेषु॥ 5.51॥

तरङ्ग लोलाम्बुजतालवृन्ता बर्हातपत्रायित भृङ्गयूथाः।
विधूतहंसावलिचामरौघाः नद्यः समातन्वत नाथसेवाम्॥ **5.52** ॥

तापानुबन्धप्रशमाय पुंसां शय्यार्थिना शार्ङ्गभृतोपहूता।
पयोदमालाव्यपदेशदृश्या प्रायस्तिरोऽधीयत योगनिद्रा॥ **5.53** ॥

इतस्ततः प्राप्तशरद्विहारं गोपीसखं द्रष्टुमतीव हर्षात्।
अशोभि नेत्रैरिव जृम्भमाणैः शीर्णैर्धरित्री शिखिनां कलापैः॥ **5.54** ॥

चराचरेष्वाहितजीवनानां अनुज्झतां सत्पथमम्बुदानाम्।
शुचित्वमन्तर्बहिरप्ययत्नात् अभ्यागतैर्हंसगणैः शशंसे॥ **5.55** ॥

संस्कारभेदैः कलमादिकानां क्रमेण लब्धोपचयस्थितीनाम्।
समुन्नतिः सन्नतिहेतुरासीत् धर्मं निजं साधयितुं क्षमाणाम्॥ **5.56** ॥

विहारगोपस्य गुणान् गृणद्भिः क्षीबाशया गीतपदैरुदारैः।
चकासुरासादितभक्तिभेदाः सामोपशाखा इव शालिगोप्यः॥ **5.57** ॥

विकस्वरेन्द्रायुधबर्हदाम्नः श्यामीकृतं कृष्णघनस्य धाम्ना।
शरत्प्रसङ्गेऽपि तदा तदासीत् बृन्दावनं बद्धमयूरलास्यम्॥ **5.58** ॥

समग्रबन्धूकरजस्समेतं स्मेरातसीमेचकमन्तरिक्षम्।
पीताम्बरेण प्रभुणा तदानीं अयत्नसम्भूतमवाप साम्यम्॥ **5.59** ॥

समग्रसप्तच्छदरेणुकीर्णैः स्रोतोभिरुन्नीतमदप्रवाहः।
स्वकानने स्वैरजुषां गजानां गोवर्धनो यूथपतिर्बभूव॥ **5.60** ॥

अधोमुखैश्च प्रतिबिम्बरूपैः अभ्युन्नतैरात्मभिरप्यशंसन्।
त्रिविक्रमस्य स्थितमुन्नतं च पदद्वयं पाथसि रक्तपद्माः॥ **5.61** ॥

पङ्कक्षये प्राक्तनवर्तनीनां वक्रेतरा व्यक्तिरभूत् पृथिव्याम्।
बहिर्मतप्रत्ययिनां व्यपोहे वेदोदितानामिव सत्क्रियाणाम्॥ **5.62** ॥

मदप्रभूतध्वनयो महोक्षा रोधोविभेदोल्बणतुङ्गशृङ्गाः।
दर्पस्य देहा इव योगसिद्धाः दन्तावलान् अन्तरयाम्बभूवुः ॥ **5.63** ॥

सरोरुहां रक्तसितासितानां श्रिया बभौ शारदवासरश्रीः।
विहारभाजा गुणभेदयोगात् व्यक्तीकृता विश्वसृजेव माया ॥ **5.64** ॥

आरक्तकल्हारविलोचनश्रीः क्लान्ता भृशं खेलगतिः स्खलन्ती।
उन्नालनालीकमधूपभोगात् मत्तेव मार्ताण्डसुता बभासे ॥ **5.65** ॥

वलग्नलग्नोर्मिवलीविभङ्गां काले यथास्थानगृहीतकार्श्याम्।
अरंस्त पश्यन्ननघोऽनुरूपां श्यामां सुदृष्टामपि सूर्यकन्याम् ॥ **5.66** ॥

शोणाकृतिं कोकनदैरुदारैः इन्दीवरैराकलितात्मकान्तिम्।
सिताम्बुजैः सूचितजाह्नवीताम् एकामनेकामिव तामभुङ्क्त ॥ **5.67** ॥

कुमुद्वतीं प्रेक्ष्य कलिन्दकन्यां तारापरिष्कारवतीं त्रियामाम्।
नभःस्थलीं च स्फुटहंसमालां नाथस्त्रिधाभूतममन्यतैकम् ॥ **5.68** ॥

बन्धूकजालैः परिधानशोभां इन्दीवरैरप्रतिमामभिख्याम्।
मुखश्रियं तामरसैर्मुरारेः सम्भृत्य लेभे शरदानुरूप्यम् ॥ **5.69** ॥

पयोधराणां पलितंकरण्या दिवश्च तारुण्यमिवार्पयन्त्या।
विचित्रभूम्ना शरदा स्वशक्तिं विख्यापयामास विहारगोपः ॥ **5.70** ॥

कुमुद्वतीकल्पितभृङ्गगीतः सन्दर्शयन् दर्पणमिन्दुबिम्बम्।
सचामरश्चन्द्रिकया सिषेवे तमीश्वरं तत्र शरत्प्रदोषः ॥ **5.71** ॥

सरोरुहां रक्तसितासितानां स्थानेषु भृङ्गध्वनिभिः प्रतेने।
जिगीषतः पञ्चशरस्य विश्वं तूर्णं प्रवृत्तैरिव तूर्यघोषैः ॥ **5.72** ॥

निर्मुक्तभोगीन्द्रनिभैः पयोदैः नभःस्थली व्याप्ततनुर्बभासे।
अनङ्गयोग्यैर्हरिनीलभूमिः धौतप्रकीर्णैरिव चामरौघैः ॥ **5.73** ॥

विभाव्य बन्धूकविभातसन्ध्यां कालोचितं कल्पयितुं विहारम्।
द्विजैरुपाधावि निसर्गशुद्धैः अङ्गीकृतानाविलतीर्थतोयैः॥ **5.74** ॥

अनिन्दितां ग्लानिमिवोद्वहन्त्यो वितेनिरे मन्दतरान् प्रचारान्।
वर्षानिशीथे दयितेन भुक्ताः श्रान्तिं प्रयाता इव शैवलिन्यः॥ **5.75** ॥

श्रिया समं भावितपद्मभूम्ना घनागमादुल्लसितः पयोधेः।
रराज नीले रविरन्तरिक्षे मणीश्वरो माधववक्षसीव॥ **5.76** ॥

अवाप्य सङ्कोचमतीव भूयः कालागमादुन्मिषतो नभस्तः।
विभागमापुर्विदिशो दिशश्च प्रजाः प्रसन्नादिव विश्वधाम्नः॥ **5.77** ॥

समुद्यतस्तिग्मरुचो घनाब्धेः उन्निद्रतां पूर्वमुपाजगाम।
रथाङ्गपाणेरिव सिन्धुजन्मा सरोजिनी चारुसरोजलक्ष्या॥ **5.78** ॥

उत्सारयन् जीर्णशिलिन्ध्रजालं प्रायो मदैः पेचकिनां प्रसिञ्चन्।
चकार सप्तच्छदरेणुजालैः कालो महीं कामविहारयोग्याम्॥ **5.79** ॥

कृतोदयाः कृष्णवलाहकेन स्रोतोवहाः स्वैरविहारभाजः।
त्रपामिव स्थानगतिप्रतीक्ष्याः स्वाभाविकीं स्वच्छदशामवापुः॥ **5.80** ॥

सुखावगाह्यैः सुदृशामतुष्यत् स्वादोत्तरैः शौरिरपेतपङ्कैः।
प्रसन्नशीतैरनघैः पयोभिः स्वभक्तचित्तैरिव यामुनीयैः॥ **5.81** ॥

अनुल्बणैरन्वहमूर्मि भेदैः सम्पन्नरेखाः सरितामधोऽधः।
श्रियो दधुः पद्मवनावतारे सोपानतां सैकतसन्निवेशाः॥ **5.82** ॥

प्रसादभाजा समयेन दत्ताः त्रैलोक्यलक्ष्म्यास्तरलस्वभावाः।
पयोधरस्थानगता विरेजुः हाराः प्रभूता इव हंसमालाः॥ **5.83** ॥

जलातपत्यागसमागमाभ्यां प्राचीमवक्रां प्रकृतिं भजन्त्यः।
तदन्वयत्यागवशादवाप्तैः पङ्कैरमुच्यन्त शनैः पदव्यः॥ **5.84** ॥

स्थाने विनिद्राः स्थलपद्मकोशाः प्रायो गतिं पान्थजनस्य रोद्धुम्।
अरुन्तुदान् आमुमुचुः परागान् आश्यानपङ्केषु महापथेषु॥ **5.85** ॥

पतत्रलीलाहतपुष्करान्तैः पद्मालयानूपुरसौम्यनादैः।
शुभैरभावि स्वपतस्त्रिधाम्नः प्रत्यूषतूर्यैरिव राजहंसैः॥ **5.86** ॥

कल्हारनिष्पादितकर्णपूरा वितीर्णबन्धूकविशेषकश्रीः।
आमुक्तपद्मोत्पलरेणुरासीत् सैरन्ध्रिका कापि शरत् त्रिधाम्नः॥ **5.87** ॥

सरोजकोशान्मिषतः प्रभुग्नान् शालीन् विपाकानतपिञ्जराग्रान्।
शुकांश्च तेष्वापततोऽनुमेने शौरिः सयूथ्यानिव शोणतुण्डान्॥ **5.88** ॥

स्ववेगसञ्छन्नगभीरभावं स्रोतस्विनीनामपहाय तोयम्।
कालुष्यमायोधनकालयोगात् वीराङ्गनानां हृदयं विवेश॥ **5.89** ॥

नवप्ररूढैर्नलिनीपलाशैः शाराणि वेशन्तजलान्यवापुः।
स्फुरत्कलङ्कस्य तुषारधाम्नः छायाभिरन्याभिरिवाविशेषम्॥ **5.90** ॥

वर्षीयसीनामपि पद्मिनीनां सौम्येन वर्षान्तरसायनेन।
सामोदमन्दस्मितहार्यभृङ्गं युक्तं श्रिया यौवनमाविरासीत्॥ **5.91** ॥

शरद्विभूतिं कुमुदावदातां संवीतनीलाम्बरदर्शनीयाम्।
अमंस्त निर्धूतघनप्रलम्बां मूर्तिं बलस्येव शुभां मुकुन्दः॥ **5.92** ॥

निद्रायितेव प्रथमं पयोदैः प्रशान्तनिद्रेव शरत्प्रसादात्।
जगत्त्रयी तद्गतिनीव भेजे जातोद्यमं जागरणे मुकुन्दम्॥ **5.93** ॥

निद्रापदेशेन जगद्विभूतिं विभावयन् नित्यविधूतनिद्रः।
प्रबुध्यमानः स विभुः प्रजानां प्रादात् स्वधर्मानुगुणं प्रबोधम्॥ **5.94** ॥

अव्यासङ्गं जलधिशयनादुत्थितस्यात्मधाम्नः
पत्युः पुण्यं प्रथमनयनस्पन्दितं प्राप्तुकामा।

नित्यापूर्वश्रुतिपरिमलं न्यस्तलीलारविन्दा
पादाम्भोजं सह वसुधया धारयामास पद्मा ॥ **5.95** ॥

अनुचरितविधिज्ञैरादृतां पूर्वपूर्वैः
महदिदमनपायं मङ्गलं मन्यमानाः।
प्रचितविविधभोग्यां प्रारभन्त प्रतीतां
वलमथनसपर्यां वल्लवा नन्दमुख्याः ॥ **5.96** ॥

वाहेषु गोषु द्विरदेषु चाग्र्यां तज्जन्यया जीविकयोपपन्नाः।
तदर्हसम्भारवतीं सपर्यां क्षिप्तापदं क्षेमविदो वितेनुः ॥ **5.97** ॥

आबालप्रेक्षणीयं प्रणतमनिमिषैरद्भुतानां प्रधानं
धूतत्रैलोक्यदोषं ध्वजममरपतेस्तूर्णमुत्थापयन्तः।
घृष्टीनामर्चनाभिः स्तुतिगुणनिकया गीतनृत्तोपहारैः
उद्वेलप्रीतिलोला विदधुरविकलैः उत्सवं गोपवृद्धाः ॥ **5.98** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये पञ्चमः सर्गः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥